श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ अष्टचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टचत्वारिंशः सर्गः ॥

## दक्षिणदिग्गतैर्वानरैः सीतानुसन्धानस्य प्रारम्भणम्

सह ताराङ्गदाभ्यां तु सहसा हनुमान् कपिः।
सुग्रीवेण यथोद्दिष्टं गन्तुं देशं प्रचक्रमे॥ **4.48.1** ॥

स तु दूरमुपागम्य सर्वैस्तैः कपिसत्तमैः।
ततो विचित्य विन्ध्यस्य गुहाश्च गहनानि च॥ **4.48.2** ॥

पर्वताग्रनदीदुर्गान् सरांसि विपुलद्रुमान्।
वृक्षखण्डांश्च विविधान् पर्वतान् वनपादपान्॥ **4.48.3** ॥

अन्वेषमाणास्ते सर्वे वानराः सर्वतोदिशम्।
न सीतां ददृशुर्वीरा मैथिलीं जनकात्मजाम्॥ **4.48.4** ॥

ते भक्षयन्तो मूलानि फलानि विविधान्यपि।
अन्वेषमाणा दुर्धर्षा न्यवसंस्तत्र तत्र ह॥ **4.48.5** ॥

स तु देशो दुरन्वेषो गुहागहनवान् महान्।
निर्जलं निर्जनं शून्यं गहनं घोरदर्शनम्॥ **4.48.6** ॥

तादृशान्यप्यरण्यानि विचित्य भृशपीडिताः।
स देशश्च दुरन्वेष्यो गुहागहनवान् महान्॥ **4.48.7** ॥

त्यक्त्वा तु तं ततो देशं सर्वे वै हरियूथपाः।
देशमन्यं दुराधर्षं विविशुश्चाकुतोभयाः॥ **4.48.8** ॥

यत्र वन्ध्यफला वृक्षा विपुष्पाः पर्णवर्जिताः।
निस्तोयाः सरितो यत्र मूलं यत्र सुदुर्लभम्॥ **4.48.9** ॥

न सन्ति महिषा यत्र न मृगा न च हस्तिनः।
शार्दूलाः पक्षिणो वापि ये चान्ये वनगोचराः॥ **4.48.10** ॥

न चात्र वृक्षा नौषध्यो न वल्ल्यो नापि वीरुधः।
स्निग्धपत्राः स्थले यत्र पद्मिन्यः फुल्लपङ्कजाः॥ **4.48.11** ॥

प्रेक्षणीयाः सुगन्धाश्च भ्रमरैश्च विवर्जिताः।
कण्डुर्नाम महाभागः सत्यवादी तपोधनः॥ **4.48.12** ॥

महर्षिः परमामर्षी नियमैर्दुष्प्रधर्षणः।
तस्य तस्मिन् वने पुत्रो बालको दशवार्षिकः॥ **4.48.13** ॥

प्रणष्टो जीवितान्ताय क्रुद्धस्तेन महामुनिः।
तेन धर्मात्मना शप्तं कृत्स्नं तत्र महद्वनम्॥ **4.48.14** ॥

अशरण्यं दुराधर्षं मृगपक्षिविवर्जितम्।
तस्य ते काननान्तांस्तु गिरीणां कन्दराणि च॥ **4.48.15** ॥

प्रभवाणि नदीनां च विचिन्वन्ति समाहिताः।
तत्र चापि महात्मानो नापश्यञ्जनकात्मजाम्॥ **4.48.16** ॥

हर्तारं रावणं वापि सुग्रीवप्रियकारिणः।
ते प्रविश्य तु तं भीमं लतागुल्मसमावृतम्॥ **4.48.17** ॥

ददृशुर्भीमकर्माणमसुरं सुरनिर्भयम्।
तं दृष्ट्वा वानरा घोरं स्थितं शैलमिवासुरम्॥ **4.48.18** ॥

गाढं परिहिताः सर्वे दृष्ट्वा तं पर्वतोपमम्।
सोऽपि तान् वानरान् सर्वान् नष्टाः स्थेत्यब्रवीद् बली ॥ **4.48.19** ॥

अभ्यधावत सङ्क्रुद्धो मुष्टिमुद्यम्य सङ्गतम्।
तमापतन्तं सहसा वालिपुत्रोऽङ्गदस्तदा ॥ **4.48.20** ॥

रावणोऽयमिति ज्ञात्वा तलेनाभिजघान ह।
स वालिपुत्राभिहतो वक्त्राच्छोणितमुद्वमन् ॥ **4.48.21** ॥

असुरो न्यपतद् भूमौ पर्यस्त इव पर्वतः।
ते तु तस्मिन् निरुच्छ्वासे वानरा जितकाशिनः ॥ **4.48.22** ॥

व्यचिन्वन् प्रायशस्तत्र सर्वं ते गिरिगह्वरम्।
विचितं तु ततः सर्वं सर्वे ते काननौकसः ॥ **4.48.23** ॥

अन्यदेवापरं घोरं विविशुर्गिरिगह्वरम्।
ते विचित्य पुनः खिन्ना विनिष्पत्य समागताः।
एकान्ते वृक्षमूले तु निषेदुर्दीनमानसाः ॥ **4.48.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे अष्टचत्वारिंशः सर्गः ॥